International Journal of Sanskrit Research 2023; 9(1): 139-140

International Journal of Sanskrit Research

अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(1): 139-140
© 2023 IJSR
www.anantaajournal.com
Received: 13-11-2022
Accepted: 15-12-2022

**डा० नीलाम्बरबाघः**
सहायकाचार्यः, साहित्यविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी, ओडिशा, भारत

**Corresponding Author:**
**डा० नीलाम्बरबाघः**
सहायकाचार्यः, साहित्यविभागः,
श्रीजगन्नाथसंस्कृतविश्वविद्यालयः
श्रीविहारः, पुरी, ओडिशा, भारत

# नैषधीयचरितमहाकाव्ये व्याकरणमीमांसा-एकमनुशीलनम्

**डा०. नीलाम्बरबाघः**

**सारांश**

महाकविश्रीहर्षः कश्चित् प्रकाण्डविद्वान् आसीत् । सः यथा दार्शनीकः तथैव साहित्यिकः तथैव वैदिकः तथा च वैयाकरणः आसीत् । तस्य काव्ये शब्दसंयोजनं चमत्कारमासीत् । संस्कृतशब्दकोशे विद्यमानानां प्रायः सर्वेषां शब्दानां प्रयोगं सः काव्ये करोति । तत् पुनः आरम्भतः नवमसर्गपर्यन्तं प्रायः शब्दभण्डारः समाप्यते । ततःपरं नवशब्दाः एव न दृश्यन्ते इति कथा तु प्रसिद्धा एव । सः महान् वैयाकरणः इति अस्मिन् शोधपत्रे साधयितुं कश्चित् प्रयत्नः अत्र साधितः वर्त्तते । दृष्टान्तमाध्यमेन पाणीनीयसूत्राणामुपहासपूर्वकं कथनं तु कविनां द्रष्टव्यमेव ।

**कूट शब्दः** प्रकाण्डविद्वान् ,दार्शनीकः , साहित्यिकः ,वैदिकः , वैयाकरणः, शब्दभण्डारः ,संस्कृतशब्दकोशः, शब्दसंयोजनं , पाणीनीयसूत्रम् ।

## प्रस्तावना

" उदिते नैषधकाव्ये क्व माघः क्व च भारविः" इति कथनेन अतिशयोक्तिः नास्ति इति नैषधीयचरितमहाकाव्यस्य अध्ययनेन स्पष्टायते । काव्यस्यास्य कविः सर्वविद्याधरः भवति । सः एकाधारेण महान् दार्शनीकः] साहित्यिकः, वैदिकः, तथा वैयाकरणः भवति ।

## विषयोपस्थापनम्

व्याकरणानुसारं शब्दानां प्रयोगज्ञानं सामान्यास्थितिः भवति । किन्तु महाकविश्रीहर्षः व्याकरणसूत्राणि आधारीकृत्य व्यंग्यरचनां विहितवान् या खलु वैशिष्ट्यमेव । पाणिनेः " अपवर्गे तृतीया "[१] इति सूत्रं स्वीकृत्य कलिः कथयति- मोक्षस्य स्त्री-पुरुषयोः कृते औचित्यमेव नास्ति] सः अपवर्गः तयोः भिन्ने (नपुंसकस्य) कृते भवति ।[२] मुनेः मतं खलु स्त्रीपुंसलक्षणा प्रकृतेः धर्मः कामसज्जा भवति । इत्थं पाणिनीसूत्राणि आधारीकृत्य श्लेषचमत्कारोऽपि प्रदर्शितो वर्त्तते । " स्थानिवदादेशोऽनल्विधौ "[३] इति सूत्रस्याधारेण इन्द्रः दोषीसिद्धः भवति ।[४] "अस्तेर्भू "[५] इति सूत्रेण काश्याः महत्त्वं प्रतिपादितं वर्त्तते ।[६] " तुह्योस्तावङ्डाशिष्यन्यतरस्याम् "[७] इति सूत्रस्योपयोगेन प्रभातवर्णनं कृतं वर्त्तते ।[८] " अत इनिठनौ "[९] इति सूत्रेण श्रीहर्षः व्याकरणनियमापेक्ष्यया लोकव्यवहारस्य मान्यतां प्रददाति ।[१०]

कवेः कथनमस्ति यत्- यथा " शशोऽस्यास्ति इति शशी " इति सूत्रस्य नियमेन मतुबर्थे निष्पन्नो भवति तथैव " मृगोऽस्यास्तीति मृगी " निष्पन्नो न भवति अतः " लक्ष्यमुद्धिश्य लक्षणप्रवृत्तिः न तु लक्षणमुद्धिश्य लक्ष्यप्रवृत्तिः" अतः व्याकरणं प्रयोगमूलं भवति । प्रयोगे व्याकरणात् लोकः एव बलीयान् ।

इत्थमेव सु, औ, जस् इत्येषाम् आधारेण श्लेषचमत्कारमाविष्कृत्य नलप्रशंसा विहिता वर्त्तते ।[११] नलवर्णने "अधीतिबोधाचरणप्रचारणैः"[१२] इति प्रयोगस्याधारः भवति पातञ्जलियमहाभाष्यस्य " चतुर्भिश्च प्रकारैविद्योपयुक्ता भवति आगमकालेन, स्वाध्यायकालेन, प्रवचनकालेन, व्यवहारकालेन" [१३] इति अंशः ।

अनेकस्थलेषु महाकविश्रीहर्षः नवीनशब्दान् आविष्कृतवान् यथा- " सूननायकः, प्रतीतचरः, अधिगामुका " ।[१४]

**उपसंहार**

उपरोक्तेषु स्थलेषु कृतेन विवेचनेन एतत् स्पष्टं भवति यत् महाकविः यथा महान् साहित्यिकः तथैव महान् वैयाकरणः । अतः खलु पाणिनीयसूत्राणि अनायासेन सः क्रीडारूपतां प्रददाति ।

**सन्दर्भ ग्रन्थाः**


1. नैषधीयचरितमहाकाव्यम् ।
2. अष्टाध्यायी ।
3. पातञ्जलमहाभाष्यम् ।
4. अष्टाध्यायी २/३/६
5. नैषधीयचरितम् १७/७०
6. अष्टाध्यायी १/१/५६
7. नैषधीयचरितम् १०/१३५,१३६
8. अष्टाध्यायी २/४/५२
9. नैषधीयचरितम् ११/११७
10. अष्टाध्यायी७/१/३५
11. नैषधीयचरितम् १९/ ६०,६१
12. अष्टाध्यायी ५/२/११५
13. नैषधीयचरितम् २२/८४
14. तत्रैव ३/२३
15. तत्रैव १/४
16. पातञ्जलमहाभाष्यम् १/१/१
17. नैषधीयचरितम् १८/१२४,१२९ A